ब्रह्मानन्द नमस्तुभ्यं सद्गुरो लोकनायक॥४॥
योगानन्दः प्रेमानन्दश्चान्ये वै ये च पार्षदाः।
रामकृष्णगतप्राणाः सर्वांस्तान् प्रणमाम्यहम्॥५॥

श्रीविवेकानन्दगीतिस्तोत्रम्-त्रिभिरेव श्लोकैः रचितमिदं स्तोत्रं भावाभिव्यक्त्या काञ्चिदुत्तमां भक्तिभावनां सृजति। शिवानुकम्पया जातं स्वामिनं विवेकानन्दं क्वचिन् महेश्वरस्य मूर्त्तरूपं, क्वचिद् उज्ज्वलसूर्यं, वेदप्रवीणं, कामिनीकाञ्चनादिबन्धरहितं मनुते।

मूर्तमहेश्वरमुज्ज्वलभास्करमिष्टममरनरवन्द्यम्।
वन्दे वेदतनुमुज्झितगर्हितकाञ्चनकामिनीबन्धम्॥१॥

अग्रे कविः "कौपीनवन्तः खलु भाग्यवन्तः" इति पङ्क्तिं स्मरन् कौपीनवतस्तस्य कोटिसूर्यप्रभां, दीप्तसिंहस्य दीप्तिं, धर्मप्रचाराय कृतं हुङ्काररवम् आसंसारं तस्य शिवस्वरूपस्य ताण्डवनृत्यं कलयति।

कोटिभानुकरदीप्तसिंहमहोकटितटकौपीनवन्तम्।
अभीरभीहुङ्कारनादितदिङ्मुखप्रचण्डताण्डवनृत्यम्॥२॥

संहाररूपशिवोऽपि आशुतोषनाम्ना प्रसिद्धः। तथैव कृपाकटाक्षेण भक्तार्तिनाशनदक्षः पापदलनदक्षः क्षणेन भुक्तिं मुक्तिं प्रददाति। अन्ततः सखायं तं स तस्य विशेषमहिमानमवलोक्य गुरुरूपेणैव स्वीकरोति।

भुक्तिमुक्तिकृपाकटाक्षप्रेक्षणमघदलविदलनदक्षम्।
बालचन्द्रधरमिन्दुवन्द्यमिह नौमि गुरुविवेकानन्दम्॥३॥

इदं वक्तुं शक्यते यत्- श्रीरामकृष्णस्य परमशिष्येषु अन्यतमः शरच्चन्द्रचक्रवर्ती परवर्तिकाले स्वामी सारदानन्दो न केवलं रामकृष्णमठमिशनयोः सेवां कृतवान्, अपि तु अत्यन्तानुगत्येन श्रीरामकृष्णस्य श्रीसारदादेव्याश्च कायिकसेवामपि कृतवान्। तस्य श्रीरामकृष्णलीलाप्रसङ्गग्रन्थे गुरोः लीलालोलं जीवनमपि अवर्णयत्।

### १.१.१४. पञ्चाननतर्करत्नः (१८६६-१९४०)

पश्चिमवङ्गस्य उत्तरचव्विशपरगणास्थायां भट्टपल्यां नन्दलालविद्यारत्नस्य सुयोग्यसन्तानरूपेण १२७३ वङ्गाब्दे भाद्रपदस्य नवमे दिवसे जात आसीत्। प्रथमपर्याये वङ्गवासिमहाविद्यालये अध्यापकरूपेण नियुक्तोऽपि पञ्चाननतर्करत्नः परवर्तिपर्याये स्वगृहे एव न्यायशास्त्रं पाठितवान्। १९०८ संवत्सरे

सारदाआक्टविरुद्धं तारकेश्वरसत्याग्रहे अंशग्रहणं कृत्वा स वन्दी आसीत्। न केवलमयं कश्चन न्यायकोविदः कविः नाट्यकारो वासीद् अपि तु काव्यशास्त्रज्ञः, सम्पादकः टीकाकारश्चासीत्। १३४७ वङ्गाब्दे आश्विने २६ दिवसे काश्यामस्य महाप्रयाणमभवत्। अस्य रचनाविश्वमेवमस्ति-

काव्यानि- शोककवितावली, पार्थाश्वमेधमहाकाव्यम्, सर्वमङ्गलोदयः, श्रीविष्णुविक्रमम्, मुकुन्ददेवात्मनिदर्शनम्, श्रीराजप्रशस्तिः, प्राणदूतम्, द्वैतोक्तिरत्नमाला, शाक्तवादसारः, मन्त्रमहिमरहस्यम्, स्तोत्रावली, जीवानुशासनम्, मातृकाप्रशस्तिः, धर्मसिद्धान्तः;

नाटकानि- अमरमङ्गलम्, कलङ्कमोचनम्;

टीकाः- देवीभाषा(चण्डी), पूर्णिमा(साङ्ख्यतत्त्वकौमुदी), परिष्कारः(वैशेषिके), शक्तिभाष्यम् (ईशोपनिषद्, ब्रह्मसूत्रम्, गीताभाष्यम्);

सम्पादनम्- मनुसंहिता, महाभारतम्, रामायणम्, भागवतम्, विष्णुपुराणम्, योगवाशिष्ठरामायणम्, देवीभागवतम्, खिलहरिवंशम्, ब्रह्मवैवर्त्तपुराणम्;

वङ्गभाषया अनुवादः- मनुसंहिता, ऊनविंशतिसंहिता, रामायणम्, विष्णुपुराणम्, दशकुमारचरितम्, मालतीमाधवम्, रत्नावली, पञ्चदशी, कामसूत्रम्।

अमरमङ्गलम्- अमरमङ्गलमिति अष्टाङ्कं नाटकं मेवारस्य राणाप्रतापस्य पुत्रस्य अमरसिंहस्य अमरजीवनीमाधारीकृत्य १९३७ संवत्सरे लिखितं वर्तते। श्लेषविरोधाभासगर्भिता नान्दी श्लोकद्वयेन प्रस्तुता।

मानसिंहस्य विश्वस्तः समरसिंहः अमरसिंहं मार्गभ्रष्टं कर्त्तुम् एकां वीरानामधेयां महिलां नियोजयति, या राणाप्रतापस्य सौजन्येन मुग्धा सती तस्य अनुगामिनी अमरसिंहस्य प्रेमिका एव जाता। अन्ततः सा एकलिङ्गनाथस्य भक्ता सती सिद्धातापसीरूपेण परिणता। राणा अमरसिंहः युद्धेन देशस्य शान्तिभङ्गं नेच्छति स्म। परन्तु मानसिंहस्य चातुर्यमवगत्य प्रतिकाराय सिद्धो जातः। एकलिङ्गनाथस्य पुरोहितः शैलदेवो मानसिंहेन पूजनाय प्रेषितं द्रव्यं नाङ्गीकृतवान्। अनेन नितरां क्रुद्धो मानसिंहो मेवाराक्रमणाय उत्तमसमयस्य प्रतीक्षायामासीत्।

एकस्मिन् महायुद्धे अमरस्य विजयो जातः। स पितृव्यं सागरसिंहं सम्राड्रूपेण घोषितवान् स्वयं चित्तोरदुर्गं प्रत्यागतवान्। वीरा अधुना सम्पूर्णतया आध्यात्मिकं जीवनं यापयन्ती विवाहं न स्व्यकरोत्। दैववाणीरूपेण अमरः पितुः प्रतापस्य आशीर्वचनं प्राप्तवान्। एवमत्र भरतवाक्येन सुखान्तं नाटकं समाप्तिमगात्। सत्यमुक्तं चट्टोपाध्यायया ऋतया- "Amaramangalam, a historical play, a rare combination of poetic and dramatic elements testified to author's prodound scholarship and nonpareil poetic brilliance by virtue of which it seems to endear itself to generation of Sanskrit lovers."[32]

## १.१.१५. स्वामी अभेदानन्दः (१८६६-१९३९)

यस्यास्ति ज्ञाननिष्ठस्य ब्रह्मात्माभेददर्शनम्।
अभेदानन्ददेवाय नमस्ते गुरुसेविने॥

स्वामिनोऽभेदानन्दस्य जन्म ०१.१०.१८६६ दिनाङ्के कलिकातायामभवत्। पितुर्नाम रसिकलालचन्द्रः। पूर्वाश्रमे नाम आसीत्- कालीप्रसादः। स ओरियेण्टालसेमिनारत एन्ट्रान्स-परीक्षायामुत्तीर्णः। यौवनस्य प्रारम्भकाले एव विविधदर्शनाध्ययनेन ख्रीष्ट्रीयधर्मप्रचारकाणां सन्निधौ ख्रीष्टधर्मं प्रति आकृष्ट आसीत्। परस्मिन् पर्याये स ब्राह्मधर्मप्रचारकाणां भाषणेन तथा शशधरतर्कचूडामणेः षड्दर्शनालोचनेन प्रभावितो हिन्दुधर्मे अनुरक्तो जातः। पण्डितात् कालीवरवेदान्तवागीशात् पतञ्जलेः योगसूत्रं पठित्वा हठयोगस्य तथा राजयोगस्य साधनायां प्रयत्नशीलोऽभवत्। १८८४ संवत्सरे श्रीरामकृष्णदेवस्य साक्षात्कारं प्राप्तवान् सः। १८८६ संवत्सरे श्रीरामकृष्णस्य तिरोधानात्परं स सन्न्यासं गृहीत्वा आकुमारीहिमाचलं भ्रमितवान्। १८९६ ख्रीष्टवर्षे स्वामिनो विवेकानन्दस्य आदेशेन स लण्डननगरं गत्वा राजयोग-ज्ञानयोग-वेदान्तादिविषये प्रवचनं कृतवान्। अस्मिन् समये एव स पल-उयसन्-म्याक्समूलारादिभिर्मनीषिभिः परिचितोऽभवत्। १९२२ संवत्सरे तिब्बत्तमार्गेण प्रत्यागमनसमये काश्मीरमार्गेण लादाकबौद्धमन्दिरं "हेमिसकन्दरं" परिदृश्य ततः यीशुख्रीष्टस्य अज्ञातजीवनकथायाः कियदंशमुद्धृत्य स्वीयं "काश्मीर ओ तिब्बत्ते" ग्रन्थे प्रकाशितवान्। कलिकतां प्रत्यागत्य सः १९२३ संवत्सरे

[32] 20th Cent. San. Lit. P.69